# 9

1075CH09

# अव्ययानि

**1. अधोलिखितानि वाक्यानि पठत —**

- दुर्वहम् अत्र जीवितम्।
- प्रकृति: एव शरणम्।
- स: सदा सत्यं वदति।
- यानानां पङ्क्तयो हि अनन्ता:।
- वायुयानं भृशं दूषितम्।
- जलं निर्मलं न अस्ति।
- एतत् खलु राजासनम् अस्ति।
- अलम् अतिशालीनतया।
- ननु भगवान् वाल्मीकि: अयम्।

उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि सर्वाणि अव्ययपदानि सन्ति। अव्ययपदानि लिङ्गवचनविभक्तिषु न परिवर्तन्ते। तद्यथा —

(क) i. बाल: अपि धावति। ii. बालिका अपि धावति।

अत्र लिङ्गकारणात् अपि परिवर्तनं न भवति।

(ख) i. यदा स: आगच्छति तदा ते गच्छन्ति। ii. यदा ते आगच्छन्ति तदा वयं गच्छाम:।

अत्र वचनकारणात् अपि 'यदा-तदा' अव्यययो: परिवर्तनं न भवति।

(ग) i. बाल: उच्चै: वदति। ii. पिता बालम् उच्चै: वदति।

अत्र विभक्तिकारणाद् अपि 'उच्चै:' इति अव्ययपदे परिवर्तनं न भवति।

अत:—

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

- अव्ययानि न परिवर्तन्ते।
- अव्ययानि त्रिषु लिङ्गेषु सदृशानि भवन्ति।
- अव्ययानि त्रिषु वचनेषु सदृशानि भवन्ति।
- अव्ययानि सर्वासु विभक्तिषु सदृशानि भवन्ति।



© NCERT not to be republished

## अव्ययपदानि

| कालवाचकानि | स्थानवाचकानि | युग्मानि | समानार्थकानि | विकीर्णानि |
|---|---|---|---|---|
| पुरा- प्राचीनकाल में<br>सद्य:- तुरन्त<br>सपदि- तुरन्त<br>अचिरात्- अभी<br>अचिरेण- अभी<br>सततम्- निरन्तर<br>अभित:- दोनो ओर<br>परित:- चारो ओर<br>उभयत:- दोनो ओर<br>सर्वत:- सब ओर<br>कदाचित्- कभी, किसी समय<br>अचिरम्- अभी<br>एकदा- एक बार<br>सकृत्- एक बार<br>सहसा- अचानक<br>सदा- हमेशा<br>इतस्तत:- इधर-उधर<br>कुत:- कहाँ से<br>नक्तम्- रात<br>दिवा- दिन<br>अद्य- आज<br>ह्य:- बीता हुआ कल<br>श्व:- आने वाला कल<br>वृथा- व्यर्थ<br>समीपे- पास में<br>दूरे - दूर | यत्र- जहाँ<br>तत्र- वहाँ<br>उपरि- ऊपर<br>कुत्र- कहाँ<br>अत्र- यहाँ<br>सर्वत्र- सब जगह<br>नीचै:- नीचे | यावत्-तावत् = जब तब<br>यत्र-तत्र= जहाँ वहाँ<br>शनै:-शनै:= धीरे-धीरे<br>यदा = जब<br>तदा = तब<br>कदा = कब<br>यदि तर्हि= यदि तो<br>मुहुर्मुहु:= बार-बार<br>यथा-तथा= जैसा वैसा<br>यथापि तथापि= जैसे भी वैसे भी | ननु, नूनम्, खलु – निश्चय<br><br>सम्प्रति, अधुना, इदानीम्, साम्प्रतम् – अब<br>सदा<br>सर्वदा<br>इत्थम्- इस प्रकार से<br>एवम्- इस प्रकार | अपि-भी<br>वृथा-बेकार<br>अथ किम्- हाँ और क्या<br>च- और<br>अपरम्- और भी<br>सत्वरम्- शीघ्र<br>अन्यथा- दूसरे प्रकार से<br>सर्वथा- सब प्रकार से<br><br>एव- ही<br>प्रति- ओर<br>अलम्- बस, समर्थ<br>च- और<br>न- नहीं<br>मा- मत<br>अत:- इसलिए<br>इति- इस प्रकार<br>उच्चै:- ज़ोर से<br>पुन:- फिर<br>तूष्णीम्- चुपचाप<br>तु- तो<br>परम्- परन्तु<br>कथम्-कैसे<br>अनृतम्- झूठ<br>तत:- तत्पश्चात्<br>परस्परम्-आपस में<br>इव- के समान |

© NCERT not to be republished

## अभ्यास:

**1. अधोलिखितानि वाक्यानि पठित्वा अव्ययपदानि चित्वा लिखत—**

**अव्ययपदानि**

(i) एकदा तस्य भार्या पितुर्गृहं प्रति चलिता। – ..............................

(ii) भवान् कुत: भयात् पलायित:। – ..............................

(iii) तत्र गम्यताम्। – ..............................

(iv) त्वं सत्वरं चल। – ..............................

(v) तेन सदृशं न अस्ति। – ..............................

(vi) गीता सुगीता च वदत:। – ..............................

(vii) यदा स: पठति तदा एव शोभते। – ..............................

(viii) तापसौ लवकुशौ तत: प्रविशत:। – ..............................

(ix) अलम् अतिदाक्षिण्येन। – ..............................

(x) अहम् अपि श्रावयामि। – ..............................

**2. उचिताव्ययपदै: रिक्तस्थानानि पूरयत—**

**मञ्जूषा**

| सर्वत्र, एव, इति, ननु, एवम्, तत्र, उच्चै:, तथापि, बहुधा, मा |
|---|

(i) मम गुरु: .............................. भगवान् वाल्मीकि:।

(ii) क: .............................. भणति?

(iii) कुपिता सा .............................. वदति।

(iv) त्वं .............................. गच्छ।

(v) यूयं चापलं .............................. कुरुत।

(vi) कृषीवल: बहुवारं प्रयत्नमकरोत् .............................. वृष: नोत्थित:।

(vii) कृषक: बलीवर्दं .............................. पीडयति।

(viii) बहूनि अपत्यानि मे सन्ति .............................. सत्यम्।

(ix) सर्वेषु अपत्येषु जननी तुल्यवत्सला ..............................।

(x) .............................. जलोपप्लव: सञ्जात:।

© NCERT not to be republished

**3. विपर्ययाव्ययपदैः सह योजयत—**

| | |
|---|---|
| यत्र .................. | यथा .................. |
| यथैव ................. | यदा .................. |
| यदैव .................. | यावत् ................ |
| अत्र.................. | यदि .................. |

**4. उचितार्थैः सह मेलनं कुरुत—**

| | | |
|---|---|---|
| (i) | पुरा | नहीं/मत |
| (ii) | उच्चैः | हमेशा |
| (iii) | नूनम् | परंतु |
| (iv) | इत्थम् | ही |
| (v) | सर्वथा | इस प्रकार |
| (vi) | एवम् | सब प्रकार से |
| (vii) | एव | इस प्रकार से |
| (viii) | परम् | निश्चय |
| (ix) | सदा | ज़ोर से |
| (x) | मा | प्राचीनकाल में |

**5. उचिताव्ययपदैः सह रिक्तस्थानानि पूरयत—**

**मञ्जूषा**

| | | | | |
|---|---|---|---|---|
| यथा-तथा, | यदि-तर्हि, | यथैव-तथैव, | यावत्-तावत्, | यत्र-तत्र। |

(i) .................... लवः .................... कुशः।

(ii) .................... अहं कृष्णवर्णः ....................त्वं किं गौराङ्गः!

(iii) .................... गुरुः वदति .................... शिष्यः करोति।

(iv) .................... वृक्षाः .................... खगाः।

(v) .................... लता आगच्छति .................... त्वं तिष्ठ।

**6. उदाहरणानुसारं लिखत—**


(i) श्वः सोमवासरः....................

(ii) ....................

(iii) ....................

(iv) ....................

(v) ....................




**7. पर्यायाव्ययपदानि लिखत—**

ननु: .................... , ....................

सम्प्रति: .................... , ....................